# संस्कृत-वार्ता:

**दिनाङ्क :-** 08.09.2024 **सायम्** - 06:20

**आदौ-मुख्यवार्ता:**

- संयुक्त-अरब-अमीरातस्य युवराजः शेख खालिद बिन मोहम्मद बिन जायद अल नाहयानः अद्य भारतं सम्प्राप्तः।
- विदेश-मन्त्री डॉ. एस.जय.शंकर भारत-खाति-सहयोग-परिषदः विदेशमन्त्रिणां प्रथमोपवेशने प्रतिभागाय सऊदी अरबस्य राजधान्यां रियाद नगर्यां सम्प्रातः।
- भारतेन ज़िम्बाब्वे ज़ांबिया, मलावी चाड चेति अफ्रीकायाः देश-चतुष्टयस्य जनानाम् खाद्यान्नावश्यकता पूरयितुं सहाय्यं प्रेषितम्।
- भारतीयऋतुविभागेन अद्य तटीय आन्ध्रप्रदेशे ओडिशायां च प्रचण्डवृष्टेः रक्तवार्णिकी सञ्चेतना प्रसारिता अस्ति।
- एशिया चषक्-हॉकी स्पर्धा मालिकायाम् अद्य भारतेन चीनदलं त्रीणि शून्यमिति अङ्कान्तरालेन पराजितम्।

**संयुक्तारबामीरातयुवराजः भारते**

संयुक्त-अरब-अमीरातस्य युवराजः शेख खालिद बिन मोहम्मद बिन जायद अल नाहयानः अद्य भारतं सम्प्राप्तः। असौ श्वः प्रधानमन्त्रिणा नरेन्द्र-मोदिना सह मेलनं करिष्यति। अस्याः यात्रायाः उद्देश्यं संयुक्त अरब अमीरात-भारतयोः सम्बम्धेषु दृढता विद्यते। श्रीखालिदस्य सह मन्त्रिणां वरिष्ठाधिकारिणाम् उद्योगपतिनाम् आर्थिक-सहभागिनाम् च एकं प्रतिनिधिमण्डलमपि आगतम्। श्री-ख़ालिदः भारते आर्थिक-सहयोग-संवर्धनाय वरिष्ठाधिकारिभिः सह उपवेशनानि अपि करिष्यति। सः तादृशेषु कार्यक्रमेषु सबभागितां करिष्यति येषु विविध- क्षेत्रषु अमीरात-भारतयोः दृढार्थिक-सांस्कृतिक-सम्बन्धः प्रदर्शयिष्यन्ते।

**उपराष्ट्रपतिः-साक्षरतादिवस**

उपराष्ट्रपतिः जगदीपधनखड़ः अद्य उक्तवान् यत् राष्ट्रिय-शिक्षानीतिः परिवर्तनकारिणी अस्ति तथा च युवानः स्वप्रतिभाम् ऊर्जाम् च पूर्णतया अन्वेष्टुं शक्नुवन्ति। श्रीधनखड़-महोदयः मुख्यातिथिः रुपेण दिल्ल्याम् अन्ताराष्ट्रिय-साक्षरतादिवसस्य अवसरे आयोजिते कार्यक्रमे भाषमाणः आसीत्। अस्मिन् अवसरे प्रवदन् उपराष्ट्रपतिः उक्तवान् यत् भाषाणां समृद्धेः विषये भारतम् अद्वितीयं राष्ट्रम् इति।

सः बोधितवान् राष्ट्रिय-शिक्षानीत्या मातृभाषायाः महत्त्वे बलं दत्तम्।

श्रीधनखड़ उक्तवान् यत् साक्षरता मुक्तिं जनयति, आश्रयतां च निवारयति। स्वतन्त्रतायाः अनन्तरं भारतस्य साक्षरतादरं द्वादश-प्रतिशन्मितम् एव आसीत् इति वदन् उपराष्ट्रपतिः अवलोकितवान् यत् देशे केवलं विंशतिप्रतिशतम् एव अधुना संयोजनं भवति। श्रीधनखडः सर्वेभ्यः आग्रहं कृतवान् यत् न्यूनातिन्यूनम् एकः जनः एव साक्षरः करणीयः इति प्रतिज्ञां स्वीकुर्वन्तु। सः उक्तवान् यत् साक्षरता मानवतायाः एव सेवा अस्ति।

**विदेश-मन्त्री**

विदेश-मन्त्री डॉ. एसजयशंकर भारत-खाति-सहयोग-परिषदः विदेशमन्त्रिणां प्रथमोपवेशने प्रतिभागाय सऊदी अरबस्य राजधानयां रियाद नगर्यां सम्प्रातः। द्वि-दिवसीय-यात्रावधौ डॉ. जयशंकर परिषदः सदस्यदेशानां विदेशमन्त्रिभिः सह द्विपक्षीयोपवेशनानि विधास्यति।

**अफ्रिकीय-देशेभ्यः साहाय्यम्**

भारतेन ज़िम्बाब्वे ज़ांबिया, मलावी चाड चेति अफ्रीकायाः देश-चतुष्टयस्य जनानाम् खाद्यान्नावश्यकता पूरयितुं सहाय्यं प्रेषितम्। विदेश-मन्त्रालयेन उक्तं यत् मलावी इत्यस्मै एक-सहस्रमीट्रिक-टन-भारमितः तण्डुः श्वः प्रेषितः। ज़िम्बाब्वे देशाय एक-सहस्र-मीट्रिक-भारमितः तण्डुलः नावाशेवा पोतपत्तनात् प्रेषितः। ज़ाम्बिया देशाय त्रयोदश-शत- मीट्रिक-टन-भारमितं स्तम्बकरि-धान्यं प्रेषितम्। भारतेन चाड़-इत्यत्र भीषणाग्निकाण्डस्य अनन्तरं त्रिशतोत्तर-द्विससहस्र-किलोग्राम-भारमिता जीवन-रक्षकौषध-चिकित्सा सामग्री प्रेषिता।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले** www.newsonair.gov.in **इत्यत्र, अथ** newsonair **चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**राजनाथः जम्मू-कश्मीरे**

केन्द्रीय-रक्षा-मन्त्री राजनाथ-सिंहेन सप्तति उत्तर-त्रिशत् अनुच्छेदस्य पुनः स्थापना सम्बद्धानां कांग्रेस-दलस्य दावों की आलोचना कृता। तेनौक्तं यत् यावत् भाजपा-दलं सत्तायामस्ति, तावत् सप्तति उत्तर-त्रिशत् अनुच्छेदस्य प्रवर्तनं नैव भविष्यति। श्रीसिंहेन वर्तमान-स्थितेः प्रवर्तने भाजपेति दलस्य प्रतिबद्धता सबलं प्रतिपादिता। अमुना भाजपा-दलस्य नेतृत्वे जम्मू-कश्मीरस्य महत्त्वपूर्ण-प्रगतिः उल्लेखिता। श्रीसिंहेन रामबन-जनपदे भव्य-स्वागताय जनानाम् आभारः प्रकटितः।

**ऋतुविभागः**

भारतीयऋतुविभागेन अद्य तटीय आन्ध्रप्रदेशे ओडिशायां च प्रचण्डवृष्टेः सञ्चेतना प्रसारिता अस्ति । आकाशवाण्याः सह चर्चायाम् ऋतु-विज्ञान-विभागस्य वैज्ञानिकः आर.के.जेनामणिः अवोचत् यत् छत्तीसगढे झारखण्डे च श्वः पर्यन्तं प्रचण्डवृष्टिः भविष्यति । ऋतुविभागेन मध्यप्रदेशस्य एकान्तक्षेत्रेषु श्वः कृते नारङ्ग-वार्णिकिसञ्चेतना अपि प्रसारिता अस्ति । सः अवदत् यत् अद्य दिल्ली-एनसीआर-क्षेत्रे लघुतः मध्यमपर्यन्तं वृष्टिः सम्भवति ।

**जवाहर-सरकारस्य त्यागपत्रम्**

तृणमूल-कांग्रेस-दलस्य संसद-सदस्य जवाहर-सरकार इत्यसौ राज्य-सभायाः अथ राजनीत्याः च त्यागपत्र-प्रदानस्य निर्णयं स्वीकृतवान् । अस्मिन् विषये अमुना दल-प्रमुखायै पश्चिम-बङ्गालस्य मुख्यमन्त्रिणे ममता बनर्जी इत्यस्यै पत्रं लिखितम्। श्रीसरकार इत्यनेन संसदः सेवायाः अवसर-प्रदानाय मुख्यमन्त्रिणे धन्यवादं विदधता राज्यस्य वर्तमान-स्थितौ असन्तोषः प्रकटितः। तेन तृणमूल-कांग्रेसपार्टीति दले व्याप्ते भ्रष्टाचारे दलस्य नेतृणां बलवत्तायां च निराशा प्रकटिता । अमुना आर.जी.कर चिकित्सालये दुष्कर्म-हत्या-प्रकरणे उक्तं जनानाम् आक्रोश स्वाभाविकः राजनीतेः पृथक् च अस्ति । उक्तवान् यत् सः पीडितायै न्यायमिच्छति । राज्य-प्रशासनं दोषिभ्यः दण्ड-प्रदाने त्वरित-कार्याचरणे च असफलं वर्तते।

**आन्ध्र प्रदेश**

आन्ध्र प्रदेशस्य मुख्यमन्त्री एन.चन्द्रबाबू नायडू अद्य विजयवाडा स्थिते राजभवने राज्यपालेन एस.अब्दुल-नजीर इत्यनेन सह अमिलत्। राज्ये जलौघ स्थिते: चर्चाम् अकरोत्। मुख्यमन्त्रिणा राज्यपालाय प्रचण्ड वर्षा कारणेन हाने: स्थिति: ज्ञापिता। मुख्यमन्त्रिणा साहाय्योद्धारस्य विवरणं प्रस्तुतम्। आशा च प्रकटिता यत् शीघ्रमेव स्थितौ परिवर्तनं भविष्यति।

**आईएसटीएस सम्मेलनम्-एम्स**

(आई.एस.टी.एस) इति भारतीय-प्रत्यारोपण-शल्य-चिकित्सक-सङ्घः देशे प्रशिक्षित-प्रत्यारोपण-शल्य-चिकित्सकानाम् आवश्यकतायाः विषये द्वि-दिवसीय-सम्मेलनस्य नवदिल्ल्याम् एम्स इत्यत्र आयोजनं कृतवान्। सम्मेलने प्रवदन् एम्स चिकित्सालयस्य शल्य-क्रिया-विभागस्य प्राध्यापकः वी.के. बंसलः अवदत् यत् आई.एस.टी.एस-संस्था सर्वकारीय-चिकित्सालयेषु प्रत्यारोपणस्य संख्यां वर्धयितुं, शल्य-क्रियायाः कृते प्रशिक्षितानां चिकित्सकानां उपलब्धता संवर्धने च विचारं करोति। सम्मेलनस्य उद्देश्यं विभिन्न-विशेषतासु प्रत्यारोपण-शल्य-चिकित्सकानाम् सहभागिता सम्वर्धनं, क्षेत्रे प्रशिक्षित-विशेषज्ञानां अभावस्य निवारणं च आसीत्।

**लखनऊ- दुर्घटना**

लखनऊ-नगरे विगतेह्नि भवन-ध्वंसे मृतकानां सङ्ख्या अष्ट सञ्जाता। अधिकारिभिः प्रोक्तं यत् साहाय्योद्धारकर्मिभिः ध्वंसावशेषात् त्रयः मृतकानां वपुंसि निष्कासितानि। आरक्षिभिः प्रोक्तं यत् भवनमिदं चतुर्वर्ष-पूर्वं निर्मितम् आसीत्। अत्रान्तरे उत्तर-प्रदेश-मुख्यमन्त्रिणा योगीना आदित्यनाथेन अधिकारिणः साहाय्योद्धार-प्रयासे त्वरता आनेतुं निर्दिष्टाः। प्रधानमन्त्रिणा नरेन्द्र-मोदिना दुर्घटनायां मृत्युमुपगतानां प्रत्येकं मृतकस्य परिजनेभ्यः द्वि-लक्ष-रूप्यकाणाम् अनुग्रह-राशि-प्रदानस्य उद्घोषणा कृता। प्रत्येकं व्रणितेभ्यश्च पञ्चाशत् सहस्र-रूप्यकाणि प्रदास्यन्ते। प्रधानमन्त्रिणा घटनायां दुःखं प्रकटयता व्रणितानां शीघ्र-स्वस्थ-लाभस्य कामना कृता।

**जम्मू-कश्मीर-निर्वाचनम्**

जम्मू-कश्मीर-विधानसभा-निर्वाचनाय गतिविधियः तीव्रताङ्गताः। प्रथमे चरणे अस्य मासस्य अष्टादशे दिने मतदानं भविष्यति। भाजपादलेन निर्वाचन-प्रचारः आरब्धः। गतदिने गृहमन्त्री अमित-शाहः पलौरा क्षेत्रे एकां जनसभां सम्बोधितवान्। श्रीशाहेन विकासं राष्ट्रिय-सुरक्षां च प्रति सर्वकारस्य वचनबद्धता प्रकटिता। कांग्रेस-नेता राहुल-गांधी अपि जम्मू-कश्मीरस्य यात्रां कृतवान्। भाजपा-दलस्य वरिष्ठ-नेतारः प्रधानमन्त्री नरेन्द्र-मोदी भाजपा-दलाध्यक्षः जगत-प्रकाश-नड्डा केन्द्रीय-मन्त्री शिवराज-सिंह-चौहानः नितिन-गडकरी मनोहर-लाल-खट्टरः जी. किशन रेड्डी च निर्वाचनाभियाने प्रतिभागं करिष्यन्ति। जम्मू-कश्मीरे द्वितीय-चरणाय मतदानम् अस्य मासस्य पञ्चविंशे दिने भविष्यति। तृतीय-चरणाय अक्टूबर-मास्य प्रथमे दिनं मतदानं भविष्यति। तदनु अक्टूबर-माससस्य अष्टमे दिने मतगणना भविष्यति।

**एशिया-चषक हॉकी-स्पर्धा**

एशिया चषक्-हॉकी स्पर्धा मालिकायाम् अद्य भारतं चीनदलं त्रीणि शून्यमिति अङ्कान्तरालेन पराजितम्। एषा स्पर्धा चीनदेशस्य हुलुनबुइर इत्यत्र क्रीडिता।

**।। इति वार्ताः।।**